शनिवारसमायुक्ता सा महावारुणी स्मृता ॥"

इति तिथ्यादितत्त्वम् ॥ * ॥

तत्र जातफलं यथा,—

"कृशः सुवेशः कुलकीर्त्तिहीनो
ज्वरायुतो मध्यधनोऽङ्गहीनः ।
तमोगुणः क्लेशकरो नराणां
मन्दस्य वारप्रभवोऽतिमन्दः ॥"

इति कोष्ठीप्रदीपः ॥ * ॥

तत्र यात्रानिषेधो यथा,—

"संत्यजेद्दिवसे यात्रां सूर्य्यारार्कीन्दुवक्रिणाम् ।"

इति ज्योतिस्तत्त्वम् ॥

वारवेलादि शनिशब्दे द्रष्टव्यम् ॥

शनैः, [स्] व, अद्रुतम् । इत्यमरः । यथा,—

"शनैर्व्विद्या शनैः कन्था शनैः पर्व्वतमारुहेत् ।
शनैः कामश्च धर्म्मश्च पञ्चैतानि शनैः शनैः ॥"

इति गारुडे १०६ अध्यायः ॥

शनैश्चरः । इति मेदिनी ॥

शनैश्चरः, पुं, (शनैर्म्मन्दं मन्दं चरतीति । चर गतौ + पचाद्यच् ।) शनिः । इत्यमरः ॥ अस्य स्तोत्रं यथा,—

"नीलाञ्जनचयप्रख्यं रविसूनुं महाग्रहम् ।
छायाया गर्भसम्भूतं वन्दे भक्त्या शनैश्चरम् ॥
व्यासेनोक्तमिदं स्तोत्रं यः पठेत् प्रयतो नरः ।
दिवा वा यदि वा रात्रौ शान्तिस्तस्य न संशयः ॥"

इति व्यासभाषितस्तोत्रम् ॥

शप्, त्र, सीत्कारः । शप् करोति । इति सिद्धान्तकौमुदी ॥

शप, य ञ औ } क्रोशे । इति कविकल्पद्रुमः ।
शप, औ ञ } (दिवा०-भ्वा०-च-उभ०-सक०-अनिट् ।) शौ तालव्यादी । य ञ, शप्यति शप्यते । औ, शप्ता । औ, अशाप्सीत् । ञ, शपति शपते । क्रोश उक्तिविशेषः । निर्भर्त्सनमिति चतुर्भुजः । सहस्रशोऽसौ शपथानशप्सत् । क्रोशो भ्वादिपक्षे गालिदानम् । शपते । भित्तेऽपि शपथाशीर्गत्यनुकारेति नियमात् शपथे आत्मनेपदं अन्यत्र परस्मैपदम् । कृष्णाय शपते गोपी । प्रचेति त्वां शशाप सा । इति रघौ । सत्यः शपामि यदि किञ्चिदपि स्मरामि । इति वाचा शरीरस्पर्शनाभावादिति पाणिनीयाः । केचित्तु शपथे नित्यमात्मनेपदं अन्यत्र विभाषया इत्याहुः । तेन प्रतिवाचमदत्त केशवः शपमानाय न चेदिभूभृते । इति माघः । इति दुर्गादासः ॥

शपः, पुं, शपथः । इति हेमचन्द्रः ॥ निर्भर्त्सनम् । गालिदानम् । इति शपधात्वर्थदर्शनात् ॥

शपथः, पुं, (शप क्रोशे + "शीङ्शपिरुगमीति ।" उणा० ३ । ११३ । इति अथः ।) अनृतं वदन् घोरं नरकं यास्यामि इत्येवं रूपं मिथ्यानिरसनम् । सत्यावधारणम् । इति स्वामी । वाचा शरीरस्पर्शनम् । इति गोयीचन्द्रः ॥ शपथो दिव्यम् । इति रमानाथः । इति भरतः ॥ तत्पर्य्यायः । शपनम् २ । इत्यमरः ॥ शपः ३ । इति हेमचन्द्रः ॥ सत्यम् ४ समयः ५ शापः ६ प्रत्ययः ७ अभिषङ्गः ८ । इति जटाधरः ॥ * ॥ चतुष्पाद्व्यवहारस्य क्रियापादाङ्गम् । यथा । अथ शपथः ।

"युक्तिष्वप्यवसन्नासु शपथैरेनमर्द्दयेत् ।
अर्थकालबलापेक्षमग्न्यम्बुसुकृतादिभिः ॥"

अर्थस्य विवादास्पदस्य बलं बहुत्वभावः । कालस्य च बलं पुण्यापुण्यत्वम् । तदपेक्षं यथा स्यादित्यर्थः । दूर्व्वाकरत्वस्य पुत्त्रादिस्पर्शस्य चाग्रे दर्शनीयत्वात् । अत्र मयैतत् कृतं न वा इति प्रतिज्ञासुचार्य्याग्नौ जले वा हस्तं प्रक्षिपेत् । एतन्मिथ्यात्वे मम सुकृतं नश्येदिति वा ब्रूयात् । न त्वग्निपरीक्षां जलपरीक्षां वा कुर्य्यात् इत्यभिप्रायवर्णनं युक्तम् । तस्या महाभियोगविषयकत्वेन शपथसमभिव्याहारानर्हत्वात् । सुकृतादिभिरित्यादिना दूर्व्वासत्याभ्युपग्रहः । तथा च विष्णुः । सर्व्वेष्वेवार्थजातेषु मूल्यं कनकं प्रकल्पयेत् । तत्र कृष्णलोने शूद्रं दूर्व्वाकरं शापयेत् । द्विकृष्णलोने तिलकरम् । त्रिकृष्णलोने जलकरम् । चतुःकृष्णलोने स्वर्णकरम् । पञ्चकृष्णलोने सीतोद्धृतमहीकरम् । सुवर्णार्द्धोने कोषो देयः । शूद्रस्य यथासमये विहिता क्रिया तथा द्विगुणेऽर्थे राजन्यस्य त्रिगुणेऽर्थे वैश्यस्य चतुर्गुणेऽर्थे ब्राह्मणस्येति । कृष्णलः काञ्चनरत्तिका तन्मूल्याद्रूने कृष्णलोने एवमन्यत्र । मनुः ।

"सत्येन शापयेद्विप्रं क्षत्त्रियं वाहनायुधैः ।
गोबीजकाञ्चनैर्व्वैश्यं शूद्रं सर्व्वैस्तु पातकैः ।
पुत्त्रदारस्य वाप्येवं शिरांसि स्पर्शयेत् पृथक् ॥"

ब्राह्मणेन मयैतत् कृतं न कृतं वेति प्रतिज्ञासुचार्य्य सत्यमिति वक्तव्यम् । तथैव क्षत्त्रियेण वाहनायुधं स्प्रष्टव्यम् । तथैव वैश्येन गोबीजकाञ्चनानामन्यतमं स्प्रष्टव्यम् । शूद्रेण तु पूर्व्वोक्तं सर्व्वमेव स्प्रष्टव्यम् । तेषां वृथाकृतस्पर्शानां पातकहेतुत्वात् पातकशब्देन निर्द्देशः । वस्त्रायुधोऽप्येवम् । दैवक्रियाविषयमाह नारदः ।

"अरण्ये निर्ज्जने रात्रावन्तर्व्वेश्मनि साहसे ।
न्यासापहरणे चैव दिव्या सम्भवति क्रिया ॥"

बृहस्पतिः ।

"देवब्राह्मणपादांश्च पुत्त्रदारशिरांसि च ।
एते तु शपथाः प्रोक्ता मनुना स्वल्पकारणे ।
साहसेष्वभिशापे च दिव्यानि तु विशोधनम् ॥"

अत्र शपथदिव्ययोः पृथक्त्वप्रतीतेः शपथे न दिव्यधर्म्माः । किन्तु वैधे कर्म्मणि तत्र शौचार्थं स्नानाचमनादि कार्य्यम् । दिव्यानि तु दिव्यतत्त्वे कथितानि नात्र लिखितानि । अत्राभियुक्तेन शपथः कर्त्तव्य इत्युत्सर्गः । उभयेच्छया अभियोक्तापि । इत्याह नारदः ।

"अभियोक्ता शिरोवर्त्ती सर्व्वत्रैव प्रकीर्त्तितः ।
इच्छयान्यतरः कुर्य्यादितरो वर्त्तयेच्छिरः ॥"

इतरः शपथकर्त्तृभिन्नः । तथा कात्यायनः ।

"आचतुर्द्दशकादह्नो यस्य नो राजदैविकम् ।
व्यसनं जायते घोरं स ज्ञेयः शपथे शुचिः ॥"

व्यसनमापत् । घोरमतिपीडाकरम् । तथा च कोषाधिकारे यस्य पश्येदित्यनुवृत्तौ विष्णुः ।

"रोगोऽग्निर्ज्ञातिमरणं राजातङ्कमथापि वा ।
तमशुद्धं विजानीयात्तथा शुद्धं विपर्य्ययात् ॥"

कात्यायनः ।

"तस्यैकस्य न सर्व्वस्य जनस्य यदि सम्भवेत् ।
रोगोऽग्निर्ज्ञातिमरणमृक्षं दद्यात् दमञ्च सः ॥
ज्वरातिसारविस्फोटगूढास्थिपरिपीडनम् ।
नेत्ररुग्गलरोगश्च तथोन्मादः प्रजायते ॥
शिरोरुग्भुजभङ्गश्च दैविका व्याधयो नृणाम् ॥"

तस्यैकस्येति न तु देशव्यापकमरणादिः । मनुः ।

"न वृथा शपथं कुर्य्यात् स्वल्पेऽप्यर्थे नरो बुधः ।
वृथा हि शपथं कुर्व्वन् प्रेत्य चेह च नश्यति ॥
कामिनीषु विवाहेषु गवां भक्ष्ये तथेन्धने ।
ब्राह्मणाभ्युपपत्तौ च शपथे नास्ति पातकम् ॥"

कामिनीष्विति रहसि कामिनीसन्तोषार्थं वृथा शपथः । एवं विवाहसिद्ध्यर्थं गोग्रासार्थं आवश्यकहोमेन्धनार्थं ब्राह्मणरक्षार्थमङ्गीकृतधनादौ । यमः ।

"वृथा तु शपथं कृत्वा कीटस्य वधसंयुतम् ।
अनृतेन च युज्येत वधेन च तथा नरः ।
तस्मान्न शपथं कुर्य्यान्नरो मिथ्यावधेप्सितम् ॥"

कीटस्येति प्राणिमात्रोपलक्षणम् । तद्वधपापेन वृथाशपथकर्त्ता युज्यत इत्यर्थः । इति व्यवहारतत्त्वम् ॥

शपनं, क्ली, (शप क्रोशे + ल्युट् ।) शपथः । इत्यमरः ॥ गालिः । इति त्रिकाण्डशेषः ॥

शप्तः, पुं, (शप + क्तः ।) तृणविशेषः । इति शब्दचन्द्रिका ॥ उलु इति भाषा ॥ अभिशापग्रस्ते, त्रि ॥ (यथा, भागवते । १ । १८ । ४१ ।

"निशम्य शप्तमतदर्हं नरेन्द्रं
स ब्राह्मणो नात्मजमभ्यनन्दत् ॥")

शफं, क्ली, गवादीनां खुरः । (यथा, याज्ञवल्क्ये । १ । २०४ ।

"हेमशृङ्गी शफैरौप्यैः सुशीला वस्त्रसंयुता ।
सकांस्यपात्रा दातव्या क्षीरिणी गौः सदक्षिणा ॥")

वृक्षमूलम् । इति मेदिनी ॥

शफरः, पुं, स्त्री, मत्स्यविशेषः । इत्यमरः ॥ पुँटी इति भाषा ॥ (यथा,—

"कैवर्त्तकर्कशकरात् शफरश्च्युतोऽपि
जाले पुनर्निपतितः शफरो विपाकः ॥"

यथा च ।

"अगाधजलसञ्चारी विकारी न च रोहितः ।
गण्डूषजलमात्रेण शफरी फर्फरायते ॥"

इत्युद्भटः ॥)

शफराधिपः, पुं, (शफराणां मत्स्यानां अधिपः ।) इल्लीशमत्स्यः । इति त्रिकाण्डशेषः ॥ तत्पर्य्यायः । इल्लिशः २ वारिकपूरः ३ गाङ्गेयः ४ जमतालः ५ । इति त्रिकाण्डशेषः ।